# संस्कृत वार्ता:

दिनाङ्क : 16.10.2026 सायम् : 06:20

<u>आदौ मुख्यवार्ता:</u>

- पी.एम.-सेतु-योजनायाम् पञ्चानाम् आई.टी.आई.-समूहानां कृते चतुर्नवत्युत्तरैकशतोत्तरैकसहस्र कोटि-रूप्यकाणां निवेशः स्वीकृतः; संचयी-निधिः सप्ताशीत्यधिकषट्शताधिकत्रिसहस्र कोटि-रूप्यकाणि अतिक्रमते।
- भारतस्य आन्तरिक-जलमार्गेषु वस्तुपरिवहनम् अष्टदशाधिकद्विशत मिलियन-मीट्रिक्-टन् परिमितं अवाप्तम्। 'मैरिटाइम्-इण्डिया-विजन् 2030' लक्ष्यं चतुर्वर्षेभ्यः प्रागेव साधितम्।
- साउदी-अरेबिया-देशस्य सुरक्षा-स्थित्या 'एयर-इण्डिया'-विमानानि निरस्तानि। रियाद्, दम्माम, जिद्दा-नगरेभ्यः विमानानाम् उड्डयनानि अक्टूबर-मासस्य विंशतिः दिनाङ्कं यावत् न भविष्यन्ति।
- महिला-क्रिकेट्-क्रीडायाम् अद्य सायङ्काले प्रथमे टी- 20 द्वन्द्वे भारतस्य महिला-दलम् जिम्बाब्वे-दलेन सह स्पर्धिष्यते।

---

<u>पी.एम.-सेतु'-योजनायाः</u>

पी.एम.-सेतु'-योजनायाः राष्ट्रिय-मार्गदर्शक-समित्याः षष्ठे उपवेशने अद्य महाराष्ट्र-ओडिशा-जम्मू-कश्मीर-राज्येषु पञ्चानाम् औद्योगिकी-प्रशिक्षण-संस्थानानाम् समूहानां कृते चतुर्नवत्युत्तरैकशताधिक एकसहस्र कोटि-रूप्यकाणां निवेश-योजना अनुमोदिता। कौशल-विकास-मन्त्रालयेन प्रोक्तम् यत् अनेन नवीन-अनुमोदनेन योजनायाः संचयी-निवेशः सप्ताशीत्युत्तरषट्शताधिक त्रिसहस्र कोटि-रूप्यकाणि यावत् अभवत्। जम्मू-कश्मीरस्य कौशल-प्रगतिः अत्यन्तम् उत्साहवर्धिका इति सचिवया देवश्री-मुखर्जी इत्यनया संसूचितम्।

---

## जलमार्ग मंत्रालय

पोत-पत्तन-तथा-जलमार्ग-मन्त्रालयेन समाख्यातम् यत् देशस्य आन्तरिक-जलमार्गेषु वस्तुवहनम् गतवर्षे एकोनत्रिंशत् मिलियन-मीट्रिक्-टन्-परिमितं आसीत्, यत् वर्धित्वा अष्टादश-अधिक-द्विशत मिलियन-मीट्रिक्-टन्-परिमितं संवृत्तम्। अनेन विंशतिः दशांश एकं त्रीणि-प्रतिशतस्य चक्रवृद्धि-वार्षिक-वृद्धिः अवाप्ता। नौवहन-मन्त्रालयेन संसूचितं यत् इयं संवृद्धिः 'मैरिटाइम्-इण्डिया-विजन्-2030' इति योजना-अन्तर्गतं समासादितं द्विशत-मिलियन-मीट्रिक्-टन्-परिमितं लक्ष्यम् अचिरादेव अतीत्य वर्तते। अपि च, जल-मापन-सर्वेक्षणैः, आधुनिक-नौवहन-अन्तर्निर्मित्या, अङ्कीय-सूचना-तन्त्रैश्च राष्ट्रस्य आन्तरिक-जलमार्ग-व्यूहः निरन्तरं सुदृढीक्रियमाणः अस्ति।

---------------------------------------------------

## विश्वबैङ्क-भारतम्

विश्व-बैङ्क-समूहेन सङ्गृहीतस्य निजनिधेः प्रमुख-स्रोतरूपेण अमेरिका-ब्रिटेन-देशाभ्यां सह भारतम् अग्रसर-राष्ट्र-रूपेण उद्भूतम्।विश्व-बैङ्कसमूहस्य अध्यक्षेण अजय-बङ्गा इत्यमुना बैङ्कॉक-नगरे विश्व-बैङ्क-वार्षिक-सम्मेलनस्य पूर्ण-सत्रं सम्बोधयता अन्ताराष्ट्रिय-विकास-वित्तीय-व्यवस्थायां भारतस्य वर्धमाना भूमिका विशेषतया प्रतिपादिता। तेन गदितं यत् विगते वर्षे दशोत्तरशत-देशेभ्यः निवेशकैः राशि-सङ्ग्रहः कृतः आसीत्, यस्मिन् अमेरिका-ब्रिटेन-भारतदेशाः च अग्रपङ्क्तौ आसन्।

---------------------------------------------------

## राजनाथ-लखनऊ

रक्षामन्त्रिणा राजनाथसिंहेन अद्य साम्प्रतिक-विरोध-प्रदर्शन-विषये काङ्ग्रेस-दलस्य मन्तव्यम् अधिकृत्य गम्भीराः प्रश्नाः उत्थापिताः। तेन प्रतिपादितं यत् काङ्ग्रेस-दलं भ्रामक-मिथ्या-सूचनाभिः जनान् भ्रमयति, अथ च निर्वाचनेषु स्वकीय-पराजयस्य प्रतिकारं साधयितुं

हिंसायाः अराजकतायाश्च आश्रयं गृह्णाति। लखनऊनगरे वार्ताहर-सम्मेलनं सम्बोधयता श्रीसिंहेन काङ्ग्रेस-दलस्य राहुल-गान्धिनः तीव्रालोचना कृता। तेन स्पष्टीकृतं यत् तेषां गान्धी इति उपनाम प्रयोक्तुं कोऽपि नैतिकः अधिकारः नास्ति। सः आरोपितवान् यत् एते नेतारः बाङ्ग्लादेश-सदृशीं हिंसात्मिकां सत्ता-परिवर्तन-व्यवस्थां भारते आनेतुम् उद्यताः सन्ति।

------------------------------------------------------

## विरोध-प्रदर्शन

दिल्ल्याः कनॉट-प्लेस-परिसरे सम्भावित-विरोध-प्रदर्शनानाम् पार्श्वे शान्ति-स्थापनाय 'भारतीय-नागरिक-सुरक्षा-संहितायाः' त्रिषष्ट्युत्तरैकशत तम-धारायाः अन्तर्गतं निषेधाज्ञा प्रवृत्ता वर्तते। आरक्षक-उपायुक्तया नेहा-यादवेन निगदितं यत् नागरिकाः निषेधाज्ञा-विरुद्धेषु जनसमवायेषु भागं न वहन्तु। अपि च, प्रशासनिक-हेतुभ्यः 'सेंट्रल-पार्क'-उद्यानम् द्विदिवसं यावत् पिहितं स्थातुम् अर्हति।

------------------------------------------------------

## भाषिणी-भाषा मॉडल

अङ्कीय-प्रज्ञायाः भाषा-समृद्धेः च सुभगः सङ्गमः। डिजिटल-इण्डिया-भाषिणी-विभागेन बेङ्गळूरु-स्थित-भारतीय-विज्ञान-संस्थानेन च संयुक्तरूपेण तमिलनाडू-राज्यस्य सौराष्ट्र-समुदायेन 'सौराष्ट्र'-इत्याख्यायाः अल्पसङ्ख्यक-भारत-आर्य-भाषायाः कृते 'पाठ-तः-वाक्' प्रद्योगिकी-प्रतिमानानां विकासः कृतः। अनेन उपक्रमेण भाषाः अङ्कीय-युगे नूतनमायुः लप्स्यन्ते इति सूचना-प्रद्योगिकी-मन्त्रालयस्य दृढः विश्वासः।

------------------------------------------------------

## प्रशासन-एटीएफ

केन्द्र-सर्वकारेण पेट्रोल-इन्धनस्य निर्यात-शुल्कं सार्ध-द्वि-रूप्यकं प्रति-लीटरमितं यावत् वर्धितम्, अपरत्र डीजल्-इन्धनस्य निर्यात-शुल्कं षोडश-रूप्यकेभ्यः न्यूनीकृत्य सार्धाष्ट-रूप्यकं

प्रति-लीटरमितं कृतम्।वित्तमन्त्रालयेन निर्गतायाः अधिसूचनायाः अनुसारं, संशोधिताः इमे मानाः अद्यारभ्य प्रवर्तिष्यते। विमान-इन्धनस्य अर्थात् एटीएफ इत्यस्य निर्यात-शुल्कं पूर्ववत् सार्ध-दश-रूप्यकं प्रति-लीटरमितमेव यथावत् रक्षितम्। सर्वकारेण स्पष्टीकृतं यत् आन्तरिक-उपभोगाय आन्तरिक-विपणिषु विक्रीयमाणयोः पेट्रोल-डीजल-इन्धनयोः वर्तमान-उत्पाद-शुल्के किमपि परिवर्तनं न कृतम्।एते अनुपाताः विगत-समीक्षायाः आरभ्य अन्ताराष्ट्रिय-विपणौ अपरिष्कृत-तैलस्य पेट्रोल, डीजल अथ च विमान-इन्धनस्य मध्यमान-मूल्यानाम् आधारेण निर्धारिताः सन्ति।

------------------------------------------------------

## उपराष्ट्रपति

उपराष्ट्रपतिना सी. पी. राधाकृष्णन् इत्यनेन अद्य कर्नाटक-राज्यस्य कारवार-स्थितस्य आई.एन.एस. कदम्ब नौसेना-स्थानकस्य प्राङ्गणे स्वदेशी-निर्मितं 'आई.एन.एस. समर्थक' जलयानं भारतीय-नौसेनायाम् समाहितम्। अस्मिन् समारोहे नौसेना-प्रमुखः एडमिरल् कृष्ण-स्वामीनाथन्, वरिष्ठाधिकारिणः, कर्णाटकस्य श्रममन्त्री सन्तोष-लाड च उपस्थिताः आसन्। उपराष्ट्रपतिणा प्रोक्तं यत् पंचसप्तति प्रतिशतात् अधिकैः स्वदेशी-घटकैः निर्मितम् एतत् जलयानम् एतादृशानां चतुर्णां यानानां शृङ्खलायाः प्रथमम् अस्ति।

------------------------------------------------------

## सऊदी-अरब-एयरइण्डिया

सऊदी-अरबदेशे जायमानां नवीनां परिस्थितिं विभाव्य एयर-इण्डिया विमान-सेवा-संस्थया अस्य मासस्य विंशतिदिनाङ्कं यावत् रियाद, दम्माम, जेद्दा इति नगरेभ्यः गतिशीलानां सर्वासां विमान-यात्राणां स्थगनं कृतम्। सामाजिक-सञ्चारपटले सूचना प्रसारयन्त्या एयर-इण्डिया-संस्थया निवेदितं यत् सा घटनाक्रमस्य सूक्ष्मावलोकनं कुर्वती वर्तते अथ च स्वसेवानां

सुरक्षित-पुनरुत्थानाय निरन्तरं स्थितेः मूल्याङ्कनं करोति। संस्थया अग्रे स्पष्टीकृतं यत् एतेन सेवा-निरसनेन प्रभावितेभ्यः सर्वेभ्यः यात्रिभ्यः पूर्ण-धन-प्रत्यावर्तनं क्रियते।

---------------------------------------------------

**<u>अमरीका-भारत एरोस्पेस</u>**

अमरीका-देशस्य 'रिफ्लेक्ट-ऑर्बिटल्'-संस्थया रात्रौ सूर्यप्रकाश-प्रदानाय भारतस्य 'स्काईरूट-एरोस्पेस'-संस्थया सह द्वयोः प्रक्षेपणयोः अनुबन्धः कृतः।

कक्ष्यायां स्थापितैः दर्पणैः आपद्-क्षेत्रेषु प्रकाश-वितरणाय तथा सौर-ऊर्जा-संवर्धनाय एषा प्रद्योगिकी उपयोक्ष्यते। एते तावत् स्काईरूट-संस्थायाः 'विक्रम-1' तथा 'विक्रम-1 यू' प्रक्षेपास्त्र-माध्यमेन सम्पादयिष्यते।

---------------------------------------------------

**<u>क्रिकेट-क्रीडा</u>**

महिला-क्रिकेटस्पर्धायां भारतेन जिम्बाब्वे-दलेन सह शृङ्खलायाः प्रथमा विंशति-प्रतिविंशतिः प्रतिस्पर्धा अद्य रायपुर-नगरस्थे शहीद-वीर-नारायण-सिंह-अन्ताराष्ट्रिय-क्रिकेट-क्रीडाङ्गणे क्रीडिष्यते। एषा प्रतिस्पर्धा भारतीय-मानक-समयानुसारं सायं सप्त-वादने प्रारप्स्यते। भारतीय-महिला-दलं विगतेषु पञ्चसु द्वन्द्वेषु निरन्तर-विजय-परम्परया सह अस्यां शृङ्खलायां प्रविशति, अपरत्र जिम्बाब्वे-दलं स्वकीयेषु विगतेषु पञ्चसु द्वन्द्वेषु पराजयं सम्मुखीकृत्य अत्र क्रीडिष्यति।